श्रीजानकीवल्लभाय नमो नमः
श्रीहनूमते नमः
श्रीमते रामानन्दाचार्याय नमः
श्रीमते योगानन्दाचार्याय नमः

श्रीरामप्रपन्नगीता

श्रीरामावतार हिन्दुधर्मोद्धारक यतिराजेश्वरेश्वर आचार्यचक्रचूड़ामणि
श्रीसम्प्रदायप्रवर्तक आद्यजगद्गुरु श्रीस्वामीरामानन्दाचार्य चरणाश्रित
कपिलावतार श्रीमद्योगानन्दाचार्यवंशोद्भव अखिलजगदोद्धारक
अनन्तश्रीसमलंकृत स्वामी प० श्रीरामवल्लभाशरण शिष्यशिष्यस्य
निखिलनिगमागमपुराणेतिहासशास्त्रपारावारपारीण
धर्मचक्रवर्ती प्रस्थानत्रयीराघवकृपाभाष्यकार
जगद्गुरुरामानन्दाचार्य पदसमलंकृत
श्रीस्वामीरामभद्राचार्य
कृपाकटाक्षाश्रित
सीतारामदासेन
संकलितः

श्रीसीतारामरसिकेभ्योनमः

वैदेहात्रिवशिष्ठकौशिकगुह व्यासेशशेषाङ्गद
ब्रह्मागस्त्यतदीयशिष्यसुरथ प्राचेतसादित्यजान्।
भारद्वाजकुमारनारदहनूमज्जाम्बवद्गृद्धपान्
वन्देरामरतान्विभीषणयुतान्सर्वाननन्याश्रयान्॥

वशिष्ठ उवाच

नमामि रामं रघुवंशभूषणं नमामि सौमित्रिमतीव सुन्दरम्।
नमामि श्रीमद्भरतं कृपानिधिं नमामि शत्रुघ्नमुदार दर्शनम्॥

श्रीश्रुतयः ऊचुः

ब्रह्मेति पठ्यतेस्माभिर्यद्रूपं परमाद्भुतम्।
तत्सर्वं कथयास्माकं त्वं देव वरदेश्वर॥

श्रीकृष्ण उवाच

तत्रास्तिमत्कारणमद्वितीयं रामः परंब्रह्मविशुद्धबोधः।
विधीशनारायणशेषपूर्वामहं च तं वर्णयितुं न शक्ताः॥

श्रीनारायण उवाच

श्यामं वारिज नेत्रपत्र ममलं प्रज्ञानमूर्तिं हरिं
विद्युद्दीप्तपिसङ्गरम्यवसनं भास्वत्किरीटोज्ज्वलम्।
कर्णालम्बितहेमकुण्डललसद्भूवल्लिमत्यद्भुतं
श्रीमन्तंभगवन्तमिन्दुसहितं श्रीजानकीशं स्मरेत्॥

श्रीभगवानुवाच

कर्ता सर्वस्य जगतः भर्ता सर्वस्य सर्वगः।
संहर्ता कार्य जातस्य श्रीरामः शरणं मम॥

श्रीशिव उवाच

यः पृथ्वीभरवारणाय दिविजैः संप्रार्थितश्चिन्मयः
सञ्जातः पृथिवी तले रविकुले मायामनुष्योऽव्ययः।
निश्चक्रं हतराक्षसः पुनरगाद् ब्रह्मत्वमाद्यं स्थिरां
कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे॥

साकेते लोकनाथः प्रथितगुणगणोऽलोकसंगीतकीर्तिः
श्रीरामः सीतयाऽस्तेऽखिलजननिकरानन्दसन्दोह मूर्तिः।
नित्यश्रीर्निर्विकारो निरवधिविभवो नित्यमायानिरासो
मायाकार्यानुसारी मनुजइव सदाभाति देवोऽखिलेशः॥

यथा कथञ्चिद्रामस्य कर्तव्यं स्मरणं परम्।
येन प्राप्नोति परमं पदं देवादि दुर्लभम्॥

श्रीपार्वत्युवाच

वदन्ति रामं परमेकमाद्यं निरस्तमायागुणसंप्रवाहम्।
भजन्तिचाहर्निशमप्रमत्ताः परंपदंयान्तितथैवसिद्धाः॥

श्रीविनायक उवाच

नीलेन्दीवरतुल्यश्यामवदनं पीताम्बरालंकृतं
मुद्रांज्ञानमयीं दधानमपरां पद्मासने संस्थितम्।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं मुकुटाङ्गदादिविविधाः कल्पोज्ज्वलाङ्गं भजे॥

श्रीब्रह्मोवाच

भक्तिर्मुक्तिविधायिनी भगवतः श्रीरामचन्द्रस्यहे
लोकाः कामदुघाङ्घ्रि पद्मयुगलं सेवध्वमत्युत्सुकाः।
नानाज्ञानविशेषमंत्रविततिं त्यक्त्वासुदूरेभृशं
रामंश्यामतनुंस्मरारिहृदये भान्तं भजध्वं बुधाः॥

श्रीशेष उवाच

दुकूलवासाः सकिरीटकुण्डलः केयूरशोभावरकङ्कणान्वितः।
कन्दर्पकोटिश्रियमुद्वहन्नृपो राजाग्रवर्य्यैरुपसंप्लुतोवुभौ॥

श्रीवाराह उवाच

इदं शरीरं शतसन्धिजर्ज्जरं पतत्यवश्यं परिणामदुर्वहम्।
किमौषधं पृच्छसि मूढ दुर्मते निरामयं रामरसायनं पिब॥

श्रीरामेति वदन्प्रीतो यातिब्रह्मसनातनम्।
सर्वाचारविहीनोपि तापक्लेशादि संयुतः॥

श्रीइन्द्र उवाच

प्रपन्नाखिलानन्दसन्दोहदोहं प्रपन्नार्तिनिःशेष नाशाभिधानम्।
तपोयोगयोगीशभावाभिभाव्यं कपीशादि मित्रं भजे रामचन्द्रम्॥

श्रीदेवा ऊचुः

द्विजो वा राक्षसो वापि पापी वा धार्मिकोपि वा।
त्यजन्कलेवरं रामं स्मृत्वा याति परं पदम्॥

श्रीकोशलेन्द्र दशरथ उवाच

एतत्तदुक्तमव्यक्तमक्षरं ब्रह्म निर्मितम्।
वेदानां हृदयं सौम्य गुह्यं रामः परन्तपः॥

श्रीविश्वामित्र उवाच

अहं वेद्मि महात्मानं रामं सत्यपराक्रमम्।
वसिष्ठोपि महातेजा ये चेमे तपसि स्थिताः॥

श्री वसिष्ठ उवाच

आपदामपहर्तारं दातारं सर्वसंपदाम्।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम्॥

श्री वामदेव उवाच

आर्तानामार्तिहर्तारं भीतानां भीतिनाशनम्।
द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम्॥

श्रीभीष्म उवाच

रामो दाशरथिर्भूत्वा सेतुर्बध्वा महोदधौ।
जघान राक्षसेन्द्रं यः तस्मै क्षेत्रात्मने नमः॥

श्री हारीत उवाच

सूर्योदये यथानाशमुदेति ध्वान्तमाशुवै।
तथैव राम स्मरणाद्विनाशं यान्त्युपद्रवाः॥

श्री देवाङ्गनाः ऊचुः

धन्यं मुखं पश्यत वीर धाम्नः श्रीरामदेवस्य पयोज नेत्रम्।
यद्दर्शनं धातृमुखासुराऽपि प्रापुर्महाभाग्य युतावयन्त्वहो॥

श्रीसुबाहुरुवाच

धन्यायोध्यां भवालोका ये राम मुखपङ्कजम्।
ब्रह्मादि सुर दुर्दर्शं महत्पुरापकृतो वयम्॥

श्रीपुरवासिन्यूचुः

ये रामं संस्मरिष्यन्ति धास्यन्ति च वदन्ति ये।
तेषामपि पयः पानं (भविष्यं/भविष्यन्ति) न जानु चित्॥

श्रीप्रह्लाद उवाच

रामनामजपतां कुतो भयं सर्वतापशमनैकभेषजम्।
पश्यतात ममगात्रसंगतः पावकोऽपि सलिलायतेऽधुना॥

श्रीसुरथ उवाच

इन्द्रः पतिष्यति क्षिप्रं पतिष्यत्यपि पद्मजः।
न पतिष्यन्ति मनुजा रामस्य निज सेवकाः॥

श्रीशत्रुघ्न उवाच

अनेके दुःख पाथोधिं तीर्णाराम तवाव्यय।
मामप्युद्धर दुःखस्थं रामराम कृपानिधे॥

श्रीपुष्कल उवाच

ये केचिद् दुस्तरं प्राप्य रघुनाथं स्मरन्तिहि।
तेषां दुःखोदधिः शुष्को भविष्यति न संशयः॥

श्रीअन्नपूर्णा उवाच

भज श्रीरघुनाथं त्वं कर्मणा मनसा गिरा।
नैःकापट्ये लोकेशं तोषयस्व महामते॥

श्रीलोमश उवाच

रामान्नास्ति परो देवो रामान्नास्ति परं व्रतम्।
नहि रामात्परो योगो न हि रामात्परोमखः॥

श्री आरण्यक उवाच

मूढोलोको हरिं त्यक्त्वा करोत्यन्यसमर्चनम्।
रघुवीरं रमानाथं स्थिरैश्वर्य्य पदप्रदम्॥

श्रीशौनक उवाच

रामेति वर्णद्वयमादरेण सदा स्मरन्मुक्तिमुपैति जन्तुः।
कलौ युगे कल्मषमानसानामन्यत्रधर्मेखलुनाधिकारः॥

श्रीनिषाद उवाच

यन्नामस्मृतिमात्रतोऽपरिमितं संसारवारान्निधिं
तीर्त्वागच्छति दुर्जनोऽपि परमं विष्णोः पदं शाश्वतम्।
तस्यैवस्थितिकारिणस्त्रिजगतां रामस्य भक्ताः प्रिया
यूयं किं न समुद्रमात्रतरणे शक्ताः कथं वानराः॥

श्रीलङ्किनी उवाच

धन्याहमप्यद्यचिराय राघवस्मृतिर्ममासीद्भवपाशमोचिनी।
तद्भक्त सङ्गोप्यति दुर्लभोममप्रसीदतां दाशरथिः सदा हृदि॥

शुक (रावणस्य दूतः) उवाच

सत्सङ्गतिं कुरु भजस्व हरिं शरण्यं श्रीराघवं मरकतोपलकान्तिकान्तम्।
सीतासमेतमनिशं धृतचापबाणं सुग्रीवलक्ष्मणविभीषणसेविताङ्घ्रिम्॥

श्रीमाल्यवान उवाच

यत्पादपोतमाश्रित्य ज्ञानिनो भवसागरम्।
तरन्ति भक्तिपूतान्तास्ततो रामो न मानुषः॥

श्रीकुम्भकर्ण उवाच

ये राममेव सततं भुवि शुद्धसत्त्वा
ध्यायन्ति तस्य चरितानि पठन्ति सन्तः।
मुक्तास्त एव भवभोगमहाहिपाशैः
सीतापतेः पदमनन्तसुखं प्रयान्ति॥

श्रीरावण उवाच

क्लेशादिपञ्चकतरङ्गयुगं भ्रमाढ्यं
दारात्मजाप्तधनबन्धुझषाभियुक्तम्।
और्वानलाभनिजरोषमनङ्गजालं
संसारसागरमतीत्य हरिं व्रजामि॥

श्रीमंदोदर्य्युवाच

व्यक्तमेषमहायोगी परमात्मासनातनः।
अनादिमध्यनिधनो महतः परमो महान्॥

श्रीत्रिजटोवाच

परंब्रह्म परंतत्त्वं परंज्ञानं परंतपः।
परंबीजं परंक्षेत्रं परंकारणकारणम्॥

श्रीजानक्युवाच

स पित्रा च परित्यक्तः सर्वैश्च परमर्षिभिः।
त्रीँल्लोकान्सं परिक्रम्य तमेव शरणं गतः॥
स तं निपतितं भूमौ शरण्यः शरणागतम्।
वधार्हमपि काकुत्स्थः कृपया पर्यपालयत्॥

श्रीमारुतिरुवाच

रामोमाता मत्पितारामचन्द्रो
रामःस्वामी मत्सखारामचन्द्रः।
सर्वस्वं मे रामचन्द्रो दयालु
र्नान्यं जाने नैवजाने न जाने॥

श्रीचम्पक उवाच

ममभाता रघोर्नाथो मत्पिता राघवस्मृतः।
ममबन्धू रामचन्द्रः स्वजनो ममराघवः॥

श्रीसनत्कुमार उवाच

सकृत्प्रपन्नाय तवास्मिवादिने यस्यप्रतिज्ञास्त्वभयप्रदाने।
रामेतिनामार्पित सर्वकामः सश्रेयसे नोस्तु महादयालुः॥

श्रीकुत्स उवाच

त्वं चेद्दयालुर्नभवेर्भवेस्मिन्सत्सङ्गतिः केनजनेनलभ्या।
महेशसर्वज्ञ सदासदार्त्त त्राणायजागर्ति दृढ व्रतंते॥

श्रीच्यवन उवाच

इत्यादिराम चरणस्मरणप्रबुद्ध
प्रेमव्रजप्रसतगद्गदवागुदश्रुः।

श्रीरामचन्द्ररघुपुङ्गवधर्ममूर्ते
भक्तानुकंपकसमुद्धरसंस्मृतेर्माः ॥

श्रीशुक उवाच

यस्यामलं नृपसदस्सुयशोऽधुनापि
गायन्त्यघघ्नमृषयो दिगिभेन्द्रपट्टम् ।
तं नाकपालवसुपालकिरीटजुष्ट
पादाम्बुजं रघुपतिं शरणं प्रपद्ये ॥

श्रीउद्धव उवाच

किं चित्रमच्युत तवैतदशेषबन्धो !
दासेष्वनन्यशरणेषु यदात्मसात्त्वम् ।
योऽरोचयत्सहमृगैः स्वयमीश्वराणां
श्रीमत्किरीटतटपीडितपादपीठः ॥

श्रीकरभाजन उवाच

त्यक्त्वा सुदुस्त्यज सुरेप्सित राज्यलक्ष्मीं
धर्मिष्ठ आर्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधावद्
वन्दे महापुरुष ते चरणारविन्दम् ॥

श्रीसनत्कुमार उवाच

श्रीरामचन्द्ररघुपुंगव राजवर्य
राजेन्द्ररामरघुनायक राघवेश ।
राजाधिराजरघुनन्दन रामभद्र
दासोहमद्य भवतः शरणागतोस्मि ॥

श्रीवेदव्यास उवाच

हा राम ! हा रमण ! हा जगदेकवीर !
हा नाथ ! हा रघुपते ! किमुपेक्षसे माम् ।
दीनं दयाल जलनिधे निजभक्तसाधो
त्वं साधुवत्सल इति प्रथितः प्रभूरि ॥

श्रीसूत उवाच

परमकारुणिको न भवत्परः
परमशोच्यतमो नहिमत्परः ।
इति विचिन्त्य हृदामयि किंकरे
यदुचितं रघुवीर तदाचर ॥

श्रीहनुमान उवाच

हानाथ ! हानरवरोत्तम ! हादयालो !
सीतापते ! रुचिरकुण्डलशोभिवक्र ।
भक्तार्तिदाहक मनोहर रूपधारिन्
मां बन्धनात्सपदि मोचय मा विलम्बम् ॥

श्रीराम उवाच

सर्वधर्मान्परित्यज्य मामेकं शरणं गतान् ।
मोचयिष्यामि सर्वेभ्यः पापेभ्यो नात्र संशयः ॥

श्रीविभीषण उवाच

नमः सीतापते राम नमः कारुणिकोत्तम ।
रावणारे नमस्तुभ्यं त्राहि मां भवसागरात् ॥

श्रीऋषय ऊचुः

त्वामासाद्य महात्मानं धर्मज्ञं धर्मवत्सलम्।
अर्थित्वान्नाथ वक्ष्यामस्तच्च नः क्षन्तुमर्हसि॥

ब्राह्मणा ऊचुः

अप्रत्तं नस्त्वया किं तु भगवन् भुवनेश्वर।
यन्नोऽन्तर्हृदयं विश्य तमो हंसि स्वरोचिषा॥

श्रीकौसल्योवाच

देव त्वद्रूपमेतन्मे सदा तिष्ठतु मानसे।
आवृणोतु न मां माया तव विश्वविमोहिनी॥

श्री कैकय्युवाच

पाहि विश्वेश्वरानन्त जगन्नाथ नमोऽस्तु ते।
छिन्धि स्नेहमयं पाशं पुत्रवित्तादिगोचरम्॥

श्रीभरत उवाच

दुराचारस्य दुष्टस्य पापिनो मे कृपां कुरु।
रामचन्द्र महाबाहो कारुण्यात्करुणानिधे॥

श्रीलक्ष्मण उवाच

अहं प्रपन्नोस्मि पदांबुजं प्रभो
भवापवर्गं तवयोगिभावितम्।
यथाऽञ्जसाऽज्ञानमपारवारिधिं
सुखंतरिष्यामि तथाऽनुशाधिमाम्॥

श्रीकाकभूशुण्डि उवाच

भो श्रीराम महाभाग भक्तिं मे देहि निश्चलाम्।
अनेन बालरूपेण सदा मे हृदये वस॥

श्रीअहल्योवाच

यस्यावतार चरितानि विरञ्चि लोके
गायन्ति नारदमुखाभवपद्मजाद्याः।
आनन्दजाश्रु परिषिक्त कुचाग्र सीमा
वागीश्वरी च तमहं शरणं प्रपद्ये॥

श्रीजनक उवाच

यत्पादपङ्कजपरागसुरागयोगि -
वृन्दैर्जितं भवभयं जितकालचक्रैः।
यन्नामकीर्तनपरा जितदुःखशोका
देवास्तमेव शरणं सततं प्रपद्ये॥

श्रीजटायुरुवाच

त्रिभुवन-कमनीय-रूपमीड्यं
रवि-शत-भासुरमीहित-प्रदानम्।
शरणदमनिशं सुरागमूले
कृतनिलयं रघुनन्दनं प्रपद्ये॥

श्रीविराध उवाच

इतः परं त्वच्चरणारविन्दयोः
स्मृतिः सदामेस्तु भवोपशान्तये।
त्वन्नाम संकीर्तनमेव वाणी
करोतु मे कर्णपुटं त्वदीयम्॥

कथामृतं पातु करद्वयं ते
पादारविन्दार्चनमेव कुर्य्यात्।
शिरश्च ते पादयुगप्रणामं
करोतु नित्यं भवदीयमेवम्॥

तवनिजजनसार्द्धंसङ्गमो मे मदीशः
भवतु विषयबन्धच्छेदने तीक्ष्णखङ्गः।
तव चरण सरोजे स्थानदानैकहेतु -
र्जनुषि जनुषि भक्तिं देहि पदारविन्दे॥

श्रीशबर्य्युवाच

तवदासस्यदासानां शतसंख्योत्तरस्य च।
दासीत्वेनाधिकारोस्ति किं नु साक्षात्तवैव हि॥

कथं रामाद्य मे दृष्टस्त्वं मनोवागगोचरः।
स्तोतुं न जाने देवेश किं करोमि प्रसीद मे॥

श्रीबाल्युवाच

मामप्यगतधर्माणंव्यतिक्रान्तपुरकृतम्।
धर्मसंहितयावाचा धर्मज्ञपरिपालय॥

श्रीसुग्रीव उवाच

त्वत्पादपद्मार्पित चित्तवृत्ति -
स्त्वन्नाम सङ्गीतकथासुवाणी।
त्वद्भक्तसेवा निरतौकरौ मे
त्वदङ्गसङ्गं लभतां मदङ्गम्॥

श्रीतारोवाच

श्रृण्वन्ति गायन्ति च ये कथास्ते रघुनन्दन।
पश्यन्ति तव पादाब्जं भवार्णवसुतारणम्॥

श्रीसमुद्रोवाच

न त्वां वयं जडधियो नु विदाम भूमन्
कूटस्थमादिपुरुषं जगतामधीशम्।
यत्सत्त्वतः सुरगणा रजसः प्रजेशा
मन्योश्च भूतपतयः स भवान् गुणेशः॥

श्रीविबुधाः ऊचुः

हरविरञ्चिनुतं तव पादयो
र्युगलमीप्सितकाम समृद्धिदम्।
हृदिपवित्रयवादिकचिह्नितैः
सुरचितं मनसा स्पृहयामहे॥

श्री राजानः ऊचुः

दिष्ट्या ते कमलवरेक्षणं सुनासं
ताम्रोष्ठं मुखमतिशोभि शुक्लदन्तम्।
पश्यामो विजयमहाहवेषु नित्यं
भ्राजन्तं निशि शरदीव पूर्णचन्द्रम्॥

श्रीबिल्व उवाच

कौशल्या सुप्रजा राम नमस्ते पङ्कजेक्षण।
राजराजेन्द्रपुत्राय नमस्ते राघवाय च॥

श्रीडिण्डिर उवाच

नमो रामायभद्राय महाराजाय ते नमः ।
सर्वभूत निवासाय ब्रह्मण्याय नमो नमः ॥

श्रीतारोवाच

त्वमप्रमेयश्च दुरासदश्च
जितेन्द्रियश्चोत्तम धार्मिकश्च ।
अक्षय्य कीर्तिश्च विचक्षणश्च
क्षितिक्षमावान्क्षतजोपमाक्षः ॥

श्रीभरद्वाजोवाच

त्वन्मंत्रजापको यस्तु त्वामेव शरणंगतः ।
निर्द्वन्द्वो निःस्पृहस्तस्य हृदयं ते सुमन्दिरम् ॥

श्रीवाल्मीकिरुवाच

पश्यंति ये सर्वगुहाशयस्थं
त्वां चिद्घनं सत्यमनन्तमेकम् ।
अलेपकं सर्वगतं वरेण्यं
तेषां हृदब्जे सह सीतया वस ॥

श्री अत्रिरुवाच

राम त्वमेव भुवनानि विधाय तेषां
संरक्षणाय सुरमानुषतिर्यगादीन् ।
देहान् बिभर्षि न च देहगुणैर्विलिप्त -
स्त्वत्तो बिभेत्यखिलमोहकरी च माया ॥

श्रीबालखिल्याः ऊचुः

क्व श्रीरियं परिमिता सुकृतैरुपात्ता
क्वात्म्ये स्थितेयमचला महती विभूतिः।
राम त्वदुत्तमपदैकजुषां मुनीना -
मिन्द्रादिसम्पदपि तुच्छकपर्दिकैव॥

श्रीयाज्ञवल्क्य उवाच

रामचन्द्र महेष्वास रघुवीर नृपोत्तम।
भो दशास्यान्तकास्माकं रक्ष देहि श्रियं च मे॥

श्रीपरशुराम उवाच

यावत्त्वत्पाद भक्तानां सङ्गसौख्यं न विन्दति।
तावत् संसार दुःखौघैर्न विमुच्येन्नरः सदा॥

श्रीशरभङ्ग उवाच

कोवा दयालुः स्मृतकामधेनु
रन्यो जगत्यां रघुनायकादहो।
स्मृतो मया नित्यमनन्यभाजा
ज्ञात्वा स्मृतिं मे स्वयमेव यातः॥

श्रीसुतीक्ष्ण उवाच

त्वन्मंत्रजाप्यहमनन्तगुणाप्रमेय
सीतापतेशिवविरञ्चिसमाश्रिताङ्घ्रे।
संसारसिन्धुतरणामलपादपोत
रामाभिरामसततंतवदासदासः॥

श्रीअगस्तिरुवाच

सदा मे सीतया सार्द्धं हृदये वस राघव।
गच्छतस्तिष्ठतोवापि स्मृतिः स्यान्मे सदात्वयि॥

श्री देवाः ऊचुः

जय मत्स्याद्यसङ्ख्येयावतारोद्भव कारण।
ब्रह्मविष्णुमहेशादि संसेव्य चरणाम्बुज॥

श्रीगन्धर्व उवाच

नमस्ते रामभद्राय वेधसे परमात्मने।
अयोध्याधिपते तुभ्यं नमः सौमित्रि सेवित॥

श्रीवरुण उवाच

त्वमेव देवाधिपतिश्च विष्णुर्जानन्ति न त्वां पुरुषा विना माम्।
सहस्त्रकृत्वस्तु नमो नमस्ते प्रसीद देवेश नमो नमस्ते॥

श्रीराम उवाच

सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम॥

सुग्रीवस्य प्रमुखाः सचिवाः ऊचुः

त्वं हि सत्यव्रतः शूरो धार्मिको दृढविक्रमः।
परीक्ष्यकारी स्मृतिमान् निसृष्टात्मा सुहृत्सु च॥

श्रीनारद उवाच

वरं न याचे रघुनाथ युष्मत्पादाब्जभक्तिः सततं ममास्तु।
इदं प्रियंनाथ वरंप्रयच्छ पुनः पुनस्त्वामिदमेवयाचे॥

श्री सहस्त्रानन उवाच

कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
पञ्चाङ्गोपासनेनैव रामेभक्तिः प्रजायते॥

श्रीलोमश उवाच

नास्तिकाय ना वक्तव्यं न चाऽश्रद्धालवे पुनः।
निन्दकाय शठायापि न देयं भक्तिवैरिणे॥

रामभक्ताय शान्ताय कामक्रोधवियोगिने।
वक्तव्यं सर्वदुःखस्य नाशकारकमुत्तमम्॥

श्रीशिव उवाच

दिने दिने पाप च यं प्रकुर्वन्
पठेन्नरश्लोकमपीहभक्त्या।
विमुक्त सर्वाघचयः प्रयाति
रामस्यसालोक्यमनन्यलभ्यम्॥

श्रीविश्वामित्र उवाच

रामाय रामभद्राय रामचन्द्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः॥

प्रपन्नैः सुगीतां हरेर्भक्तिदात्रीं
कलेर्दोषहंत्रीं पठिष्यन्ति लोके।
जना ये भवेद्रामभक्तिश्च तेषां
नतिर्मेस्तुतेभ्यो मनः कायवाग्भिः॥

इति श्रीरामप्रपन्नगीता समाप्ता॥